वेतानामल्पमल्पं पूर्वं ॥ आवापसमवेतानां आवापाश्च ते समवेताश्च आवापसमवेता
स्तेषां । यत्रावापानां बहूनां समवायः तत्राल्पमल्पं पूर्वं आवपनीयं । यथा एकोऽभिप्लव
षडहः अपरस्तस्यैव पंचाहः चतुरहस्त्र्यहो द्व्यहो वा । तत्र पंचाहादेः पूर्वमावापः ततोऽभिप्ल
वषडहस्येति । एवं सत्र धारणोपयोगिनी परिभाषामुक्त्वा अधुना त्रयोदशरात्रप्रभृतीनि
सत्राण्याह ॥ द्वित्रयोदशरात्रे । द्वे सत्रे त्रयोदशरात्रे त्रयोदशसु भवतः तत्र प्रथमस्याहान्या
ह ॥ पृष्ठ्यः सर्वस्तोमोतिरात्रः । द्वादशाहधर्माः सत्रेष्विति सूत्रेण तेन सर्वेषु सत्रेषु द्वादशाहध
र्मा भवंति अतस्त्रयोदशरात्रे द्वादशाहः सकलोऽपि भवति । स्यमहर्गणेन दर्शयमाह ॥ पृ
ष्ठ्यास्सर्वस्तोमोतिरात्र इति पृष्ठ्यानंतरः सर्वस्तोमसंज्ञकोऽतिरात्रो भवति । ततस्महः स्थं
दोमा अविवाक्यमुदयनीय इति । अत्र प्रथमं प्रायणीयातिरात्रः पृष्ठ्यः षडहः सर्वस्तो
मोतिरात्रः चत्वारश्छंदोमा उदयनीयातिरात्र इति । अतिरात्रः पृष्ठ्यः षडहः सर्वस्तोमोति
रात्रश्चत्वारश्छंदोमानां सर्वत्रातिरात्रश्च एवं व्यामो द्वादशाहोपन्त्रयोदशे रात्रे इति तां
प्रेक्षतत्वात मानवे द्वादशाहपुरस्ताच्छंदोमानां सर्वस्तोमोतिरात्रः ऋद्धिकामास्त्रयोदश १७

17

रात्रमुपेयुरिति तथा ॥ उपोत्तमं व्रतमुत्तरस्य प्रतिष्ठाकामास्त्रयोदशरात्रमुपेयुः द्वादशा
हस्य मध्ये विषुवान्ब्रह्मवर्चसकामास्त्रयोदशरात्रमुपेयुः चतुर्विंश उक्थ्यो नवरात्रो महारात्रं प्र
तिष्ठाकामास्त्रयोदशरात्रमुपेयुरिति ॥ प्रकृतिविहितं द्वितीयं द्वितीयं त्रयोदसरात्रे
प्रकृतिविहितं भवति प्रकृतिविहितमित्यकृत्वान्यप्रकृतिविहितेषु महाव्रतं दशरात्रात्पुन
रेकाहार्थमिति सूत्रेण दशरात्रात्पुनरं महाव्रतं भवति ॥ अतिरात्रो द्वादशाहादिनि महाव्र
तं वातिरात्र इत्येतितत्प्रस्मृते ॥ संभार्यन्तृतीयं तृतीयं त्रयोदशरात्रे संभार्यास्त्र्यहे रेवोय
द्विष्ठैरेवाहोभिः संभरणीयं नत्वावापिकैः प्रस्तरणीयं तद्वत्संभरणमाह ॥ प्रायणीयाच्चतु
र्विंशमहरभिजित्त्रयः स्वरसामानो विषुवांस्त्रयः स्वरसामानो विश्वजिद्व्रतमुदयनीयोति
रात्र ॥ प्रायणीयानन्तरं चतुर्विंशमहर्द्वितीयमहर्भवति ततः अभिजित् ततः स्वरसामानः त
तो विषुवान् ततः त्रयः स्वरसामानः ततो विश्वजित् ततो महाव्रतं तत उदयनीयोतिरात्र इति
इदं तृतीयं त्रयोदशरात्रे षड्विंशवाल्लरणे अतिरात्रश्चतुर्विंशं प्रायणीयमहरभिजित्त्र
यः स्वरसामानो दिवाकीर्त्यमहस्त्रयः स्वरसामानो विश्वजिन्महाव्रतमुदयनीयोतिरात्र
इति चतुर्दशरात्राणि त्रीणि प्रीणासत्राणि चतुर्दशरात्राणि चतुर्दस सत्राणि भवन्ति त
त्राहान्याह ॥ द्वे पृष्ठ्यौ प्रथमे चतुर्दशरात्रे प्रायणीयातिरात्रात् ततो द्वे पृष्ठ्यौ षडहो भव

दे॰ अ॰ तः प्रतिलोमः परः द्वयोः पक्षयोर्मध्ये यो द्वितीयः पक्षः प्रतिलोमो विपरीतक्रमो भवतीत्र
१८ यस्त्रिंशारंभणो भवतीत्यर्थः। पृष्ठ्यषडहे हि त्रिवृत्पंचदशसप्तदशैकविंशत्रिणवत्रयस्त्रिं
शा इति क्रमेणाहानि। प्रतिलोमस्तु विपरीतक्रमेण प्रथमं त्रयस्त्रिंशस्तोमं ततस्त्रिणवं
तत एकविंशा ततः सप्तदशं ततः पंचदशं ततस्त्रिवृत इति। अतिरात्रः पक्षः षडहः पक्षः
18 षडहस्त्रयस्त्रिंशारंभणातिरात्रः इति तात्पर्यः॥ मध्यमे त्रिककुभः पक्षमभितः मध्य
मे चतुर्दशरात्रे पक्षमभितस्त्रिककुभा भवंति॥ प्रतिलोमाः परे पक्षात्परे ये त्रिककुभः
ते प्रतिलोमा विपरीतक्रमा भवंति प्रायणीयः त्रिककुभा ज्योतिर्गौरायुः ततः पक्षः
षडहः ततः आयुर्गोर्ज्योतिरिति विपरीतक्रमास्त्रिककुभः तत उदयनीयः इति अतिरात्रो
ज्योतिर्गौरायुरन्यहः पक्षः षडहः आयुर्गोर्ज्योतिरिति रात्रो यास्तल्प्यवो दके वा विवाहे वामि
मांसेरस्तरणताराणीरूपेषु रितक्रतेः॥ यास्तु रषास्तल्पेशय्यायां वा उदके अभिषेकार्थे
विवाहे वा मीमांसेरन् विवदमाना ते मीमांसमाना एताएत्रीरूपेषु रीति तल्पाद्यर्थे नाधिकारिणा
इत्यर्थः॥ तथा चाश्वलायनः॥ तस्यैवोदके कविवाहे वा मीमांसमाना द्वितीयमिति॥ प्रवृ १८
त्ति विहितं तत्र तीर्थं तत्तीयं चतुर्दशरात्रं प्रवृत्ति विहितं भवति आवायप्रकारेणेषु प्रणीय
मित्यर्थः॥ ततः अयप्रायणीयः॥ गो आयुषी दशरात्रे उदयनीय इति अतिरात्रो गो आयु

अथैकस्मिन्नौ द्वादशाहस्य दशाहान्यतिरात्रइति तानेवावर्त्तनात् ॥ पंचदशरात्राणि चत्वारि ।
चत्वारिंशत्राणि पंचदशरात्राणि पंचदशस्तुतानि भवंति उत्तरे प्रकृति विहिते उत्तरे चतु
र्थ चतुर्थे पंचदशरात्रे प्रकृति विहिते भवतः आवापप्रकारेण पूरणीयेत्यर्थः । अहार्थे
त्रिकद्रुकेः पूरणं कार्यमित्यभिप्रायः ॥ चतुर्दशरात्राभ्यां पूर्वं व्याख्याते । पूर्वे प्रथमद्विती
ये पंचदशरात्रे चतुर्दशरात्राभ्यां व्याख्याते । विशेषमाह ॥ पक्षयोर्मध्ये महाव्रतं । प्रथ
मे पंचदशरात्रे पक्षयोर्मध्ये महाव्रतं भवति तेन प्रायणीयः पक्षः । महाव्रतात्पुच्छः
उदयनीयइति । अतिरात्रः पक्षः षडहो महाव्रतं पक्षः षडहस्त्र्यस्त्रिंशः शारंभाणोऽति
रात्रइतिश्रुतेः ॥ अतिरात्राद्ग्निष्टुद्द्वितीयस्य द्वितीयस्य पंचदशरात्रस्य प्रायणीया
तिरात्रान्तरोग्निष्टुद्भवति अभाग्निष्टुति सर्वं महाद्दिक माग्नेयं भवति तेनैवा प्रायणी
यः अग्निष्टुत् ज्योतिः गौरायुः पक्षः । आयुः गौः ज्योतिः । उदयनीयइति । अतिरात्र
स्त्रिवृदग्निष्टुदग्निष्टोमे ज्योतिर्गौरायुस्त्र्यहः पक्षः षडहः आयुर्गौर्ज्योतिरितिरात्रइ
तिश्रुतेः ॥ स प्रायणीयस्तृतीयस्यात् तृतीयस्य पंचदशरात्रस्य स एवाग्निष्टुत्प्राय
णीयो भवति तत्र श्रेवो त्रिवृदग्निष्टुदग्निष्टोमसस्तुः । त्रिकद्रुकाः दशरात्रउदयनी
यइति ॥ त्रिवृदग्निष्टुदग्निष्टोमा ज्योतिर्गौरायुस्त्र्यहो द्वादशाहस्य दशाहान्यतिरात्र

दे॰ अ॰ इति स्मृतेः। चतुर्थे पंचदशरात्रो प्रायणीयस्त्रिवृदग्निष्टुदुक्थाः दशरात्रे उदयनीय इति। अतिरात्रो ज्योति
१९ र्गौरायुरित्यहो द्वादशाहस्य दशाहान्यतिरात्र इति स्मृतेः। १। अत्राग्निष्टुत्प्रथममहः। तत्र नाम
धेयादाग्नेयी सुब्रह्मण्या प्राप्ता। ज्योतिरादिषु नाम्नाऐन्द्री प्राप्ता। द्वादशाहे द्वादशाहिके चैकादशसु
चोदकेनैन्द्री प्राप्ता। तत्राग्निष्टुद्दिवसे सुयथास्वं सुब्रह्मण्या भवति। भेदेन करणाद्विरोधाभा
19 वात्। यत्र तु विरोधः सोमे पर्युह्यमाणे आतिथ्यायामुपसत्सु च तत्र भक्षस्त्वैन्द्र्याः करणेन नामप्राप्ता
पि बाध्यत इति सद्वस्वामी। वार्त्तिककारास्त्वेवं न मन्यन्ते। कथं यावता वदसती वरीयहरणात्त्र
त्र कालं सुब्रह्मण्या साप्रतिदिनं क्रियते सा यथादैवतं कर्त्तव्या। अग्निष्टुत्याग्नेयी। अन्येषु
चैन्द्री। तत्र तावत्संशय एव नास्ति। भेदेन करणादविरोधात्। यात्वातिथ्यायामुपसत्सु च क्रियते
तत्र तंत्रेणाक्रियमाणायां विरोधः। तत्राग्निदैवतासंस्कारात्मकत्वाल्लिंगादस्याः यथादैवतमेव
सुब्रह्मण्या स्थानभेदः। नास्त्यत्र तंत्रेणोच्चारणं यत्र हि सहान्यैकतंत्रं सर्वेषामुपकारोतीति तत्र तंत्र
ता। न चाग्नयोरन्यतस्मिन्संस्कृते अन्यः संस्कृतो भवतीति। अत एव प्रसंगोपि न युज्यते १९
अन्यार्थेनाप्यन्यस्योपकारो सिध्यतीति स्यात्प्रसंगः। न चैवं मा सुब्रह्मण्यया अग्नेः संस्कारः सिध्यति
तस्मादत्र अपि सुब्रह्मण्या भेदेनैवाह्वातव्येति। अनेनैव न्यायेन सवाजपेये सर्वमेधे द्वादशा
हे च साधारणं सुब्रह्मण्या स्थानं द्रष्टव्यं। १। प्रकृतिविहितानि प्राग्निर्वपणाच्छान्तिरात्रात् त्रयोदश

रात्रादारभ्य प्राग्विंशतिरात्राद्वा ये सत्रात्राणि प्रकृतिविहितानि आवापप्रकारेण प्रायणीया
नितरात्रश्च स्तिभक्तत्वात् षोडशरात्रे प्रायणीयः त्रिकद्रुका दशरात्रं महाव्रतमुदयनीय इति। एता
एव समहाव्रता इति भक्तत्वात् सप्तदशरात्रे प्रायणीयः अभिप्लवस्यायं चाहः दशरात्रश्च उदयनी
य इति। अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पंचाहो द्वादशाहस्य दशाहान्यतिरात्र इति भक्तेः
अष्टादशरात्रे प्रायणीयः अभिप्लवः षडहः दशरात्रश्च उदयनीय इति। अतिरात्रो अभिप्लवः ष
डहो द्वादशाहस्य दशाहान्यतिरात्र इति। एकोनविंशतिरात्रे प्रायणीयः। अभिप्लवः षडहः दशरा
त्रः। महाव्रतं उदयनीय इति एता एव समहाव्रता इति भक्तेः एतत् एव पूर्वं खंडे [illegible] एव महाव्रतस
हिता भवंतीत्यर्थः विंशतिरात्रे अभिप्लवो अभिजिद्विश्वजितो वा विंशतिरात्रे प्रथमं प्राय
णीयः। ततो अभिप्लवः षडहः ततो अभिजित्। ततो विश्वजित्। ततो दशरात्रश्च उदयनीय इति। अति
रात्रो अभिप्लवः षडहो अभिजिद्विश्वजितौ द्वे अहनी द्वादशाहस्य दशाहान्यतिरात्र इति भक्तेः॥ एक
विंशतिरात्रयोरतिरात्राव षोडशिकौ। द्वयोरप्येकविंशतिरात्रयोः प्रायणीयोदयनीया
वतिरात्रो अषोडशिकौ भवतः॥ अभिप्लवान्वयः प्रथमा इति रात्रः तत्र प्रथमे एकवि
शतिरात्रे प्रायणीयः ततो अभिप्लवान्वयः। तत्र त्रयाणामभिप्लवानां मध्ये प्रथमा अभि
प्लवान्परो जिरात्रो भवति। ततस्त्वेवं अषोडशिकः प्रायणीयः ततो अभिप्लवः। अतिरात्रः

दे॰ अः सषोऽसिक्तः ततो द्वावभिप्लवौ। अथोऽशिर्भ्य उदयनीय इति। अतिरात्रोऽभिप्लवः षडहोऽतिरात्रो
२० ऽभिप्लवषडहोऽतिरात्रः पशुकामा उपेयुरिति श्रुतेः॥ निदाघे द्वितीयं ब्रह्मवर्चसकामानां। द्विती
यमेकविंशमतिरात्रं निदाघस्यो ब्रह्मवर्चसकामानां यजमानानां भवति। तत्राहान्याह।
त्रयस्त्रयः स्वरसामानो विषुवन्तमभितः तत्र द्वितीये एकविंशातिरात्रे विषुवन्तमभितः विषु
20 वतः पूर्वं पश्चाच्च त्रयस्त्रयः स्वरसामानो भवन्ति॥ पृष्ठ्योऽवाचशब्दाहभिजः उत्तरः प्रतिलोमः
उत्तरो द्वितीयः पृष्ठ्यः प्रतिलोमस्त्रयस्त्रिंशारंभणो भवति। ततश्चैवं। प्रायणीयः पृष्ठ्यः॥
त्रयः स्वरसामानः विषुवान्। स्वरसामानस्त्रयः। त्रयस्त्रिं॰ शारंभणः पृष्ठ्य उदयनीय इति। अ
तिरात्रः पृष्ठ्यः षडहस्त्रयः स्वरसामानो दिवाकीर्त्यम् हस्त्रयः स्वरसामानः पृष्ठ्यः षडहस्त्रय
स्त्रिंशारंभणोऽतिरात्रो ब्रह्मवर्चसकामा उपेयुरिति श्रुतेः। अत्र विषुवति विशेषमाह॥ मानव्यः
समिधेन्यः। मनुना दृष्टा मानव्यस्ताः सामिधेन्यो भवन्ति। विषुवति॥ सौमापौष्णः उपालभ्यः।
सोर्यो द्वितीयोऽस्त्येव सौमापौष्णस्तृतीय उपालभ्यः। उपसमिधे पृषदाज्यं बंधनीयपद इत्यर्थः। सौ
मापौष्णं पशुमुपालभ्य मालभेरन्मानवीः सर्वाः सामिधेन्यो भवन्तीति श्रुतेः॥ प्रकृतिविहिता २०
न्याहान्त्रि॰ शद्रात्रात्। आद्यःऽमाभि विधौ। कर्मविषयत्वात्। अप्रयाजेभ्य इत्यादिवत्। द्वाविं
शतिरात्रादय माहान्त्रिंशद्रात्रान्तान्द्वात्रिंशद्रात्रमभिव्याप्य एकादश सत्राणि प्रकृतिविहिता

निश्चावापप्रकारेणाप्रकरणीयानि भवंति॥ द्वाविंशतिरात्रमन्नाद्यकामानां॥ यजमानानां भ
वति। तत्र प्रकरणं। प्रायणीयः त्रिकद्रुकाः ततोऽभिप्लव ततो दशरात्रः ततो महाव्रतमुदयनीय
इति। अतिरात्रो ज्योतिर्गौरायुस्त्र्यहोऽभिप्लवः षडहो द्वादशाहस्य दशाहानि महाव्रतं चातिरा
त्रश्चान्नाद्यकामा उपेयुरिति श्रूते॥ त्रयोविंशतिरात्रं प्रतिष्ठाकामानां भवंति। तत्र प्राय
णीयः अभिप्लवस्य पंचाहः ततोऽभिप्लवः षडहः दशरात्र उदयनीय इति। अतिरात्रो ज्योतिर्गौरा
युर्गौरायुः पंचाहोऽभिप्लवः षडहो द्वादशाहस्य दशाहान्यतिरात्रः प्रतिष्ठाकामा उपेयुरिति श्रू
तेः॥ पूर्वं चतुर्विंशतिरात्रं प्रजाकामानां॥ पशुकामानां च॥ पूर्वं प्रथमं चतुर्विंशतिरात्रं प्रजा
कामानां पशुकामानां वा भवति। तत्र प्रायणीयः॥ द्वावभिप्लवौ ततो दशरात्र उदयनीय इति
अतिरात्रो द्वावभिप्लवौ षडहो द्वादशाहस्य। दशाहान्यतिरात्रः प्रजाकामा वा पशुकामा वोपेयु
रिति श्रूते॥ द्वितीयं चतुर्विंशतिरात्रं संसद इति संज्ञा संसद इति षष्ठ्येकव
चनं। यथा। द्वादश संवत्सरं प्रजापतेः षड्विंशत्संवत्सरं शास्त्रानामित्यादि। तेन संसदो यनमि
त्येवं संज्ञमित्यर्थः तथा चमैत्रादि सत्रेष्वस्य संसदामयनमिति संज्ञा दृश्यते। तत्र विशेषब्रह्म
स्य विशालइति इदं नामानमेवाह॥ पार्ष्ठिकानि त्र्योदश तद्गणोऽप्रतिलोमानुलोमानि। पार्ष्ठिका
नि पृष्ठ्य षडह संज्ञानि उत्तराणि चतुर्थप्रभृतीनि त्र्योदशहानि एकविंशस्त्रिणव त्रयस्त्रिंश।

दे॰ अ॰ निप्रतिलोमान्यनुलोमानि वात्र भवंति। पूर्वं प्रतिलोमानि षष्ठपंचमचतुर्थानि। ततोनुलोमा
२१ नि चतुर्थपंचमषष्ठानि। अस्याह्नः षडहस्य विशालस्येति संज्ञा॥ तमभितोग्निष्टोमावनिरुक्तौ।
तं विशालमभितो। निरुक्तावग्निष्टोमौ भवतः पृष्ठ्यस्तोमौ वा पूर्वस्मिन्नुक्ते। उत्तमे षडहो बृहद्
रथंतरपृष्ठः पृष्ठ्यस्तोमाश्च भवंति। तौ पृष्ठ्यस्तोमौ बृहद्रथंतरपृष्ठौ षडहो विकारास्ते साग्निष्टो
मं विशालमभितो भवतः॥ उत्तरः प्रतिलोमः। तयोः साग्निष्टोमं विशालमभितः क्रियमाणयोः पृ
ष्ठ्यस्तोमयोर्मध्ये उत्तरः साग्निष्टोमस्य विशालस्य पश्चात्क्रियमाणः पृष्ठ्यस्तोमः प्रतिलोमोऽन
हः प्रभृति भवति॥ तस्माद्यग्निष्टोमावनिरुक्तौ। योयं प्रतिलोम उत्तरः पृष्ठ्यस्तोम उक्तः तस्मा
त्परो अनिरुक्तो द्यावग्निष्टोमौ भवतः। पूर्णमेतत्सत्रं। ततश्चैवं प्रायणीयः पृष्ठ्यस्तोमः। ष
डहः अनिरुक्तोग्निष्टोमः ततः षष्ठपंचमचतुर्थानि षाडहिकान्यहानि। ततश्चतुर्थपंचमषष्ठानि
तान्येव षोडश्यादीनि। ततो निरुक्तोग्निष्टोमः ततस्त्रयस्त्रिंशारंभणः पृष्ठ्यस्तोमः षडहः ततो
ग्निष्टोमावनिरुक्तौ तत उदयनीयमहरिति। अनिरुक्तं ततोऽनुलोममुपहव्ये उक्तं। अनिरुक्तः पृष्ठ्य २१
स्तोमः षडहस्त्रयस्त्रिंशमहरनिरुक्तमुपहव्यस्य तंत्रेणोक्तं तस्य ककुबुष्णिहं रथंतरं मध्यंदिने पत्रत्रय
स्त्रिंशं निरुक्तं त्रिणवं द्वे एकविंशे त्रिणवं च पञ्चदश महानीरुक्तं त्रयस्त्रिंशमहरनिरुक्तं पृ
ष्ठ्यस्तोमः षडहः प्रत्यङ्त्रिवृद्द्व्यहरनिरुक्तं ज्योतिष्टोमोग्निष्टोमोऽतियत्र निरुक्तेः। प्रत्यङि

तित्रयस्त्रिंसारंभणं इत्यर्थः॥ पंचविंशतिरात्रमन्नाद्यकामानां भवति। तत्राहानि। प्रायणीयः द्वा
वभिप्लवौ। दशरात्रो महाव्रतमुदयनीय इति। एतावदेव समहाव्रतं इति श्रुतेः। एताः पूर्वं षंडोक्ताः॥ षड्विं
शतिरात्रं प्रतिष्ठाकामानां भवति। तत्र प्रायणीयः। गो आयुषी। द्वावभिप्लवौ दशरात्र उदयनीय इ
ति। अतिरात्रो गो आयुषी अवधि अहनि द्वावभिप्लवौ। षडहो द्वादशाहस्य दशाहान्यतिरात्र इति प्रक्रम
प्रतिष्ठाकामा उपेयुरिति श्रुतेः॥ सप्तविंशतिरात्रम् ऋद्धिकामानां भवति। तत्र प्रायणीयः॥ त्रि
ककुभः। द्वावभिप्लवौ दशरात्र उदयनीय इति॥ अतिरात्रो ज्योतिर्गौरायुस्त्र्यहो द्वावभिप्लवौ षड
हो द्वादशाहस्य दशाहान्यतिरात्र ऋद्धिकामा उपेयुरिति श्रुतेः॥ अष्टाविंशतिरात्रं प्रजाकामानां
पशुकामानां वा भवति। तत्र प्रायणीयः त्रिककुभः द्वावभिप्लवौ। दशरात्रो महाव्रतम् उदयनीय इति
एतावदेव समहाव्रतानि इति श्रुतेः॥ एकोनत्रिंशद्रात्रे प्रायणीयः अभिप्लवस्याद्यं त्र्यहः। द्वावभिप्लवौ
दशरात्र उदयनीय इति। अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पंचाहो द्वावभिप्लवौ षडहो द्वादशाहस्य
दशाहान्यतिरात्र इति प्रतत्यानं तामेवैताभिः श्रियं उपती इति श्रुतेः। त्रिंशद्रात्रे। प्रायणीयस्त्र्यहो
भिप्लवा दशरात्र उदयनीय इति। अतिरात्रस्त्र्यहोभिप्लवाः षडहो द्वादशाहस्य दशाहान्यतिरात्रो
अन्नाद्यकामा उपेयुरिति श्रुतेः॥ एकत्रिंशद्रात्रे प्रायणीयः त्र्यहोभिप्लवा दशरात्रो महाव्रतमुदय
नीय इति। एतावदेव समहाव्रतानि इति प्रतत्यानाभिपूर्वमेताभिरन्नाद्यमवरुन्धत इति श्रुतेः॥ द्वात्रिंशद्रा

दे॰ अ॰ चावकाशंत्यमुकामना भवति। ततश्च प्रायणीयः। गो आयुषी त्रयो भिप्लवा दशरात्र उदयनी
२२ य इति। अतिरात्रो गोश्चायुश्च द्वे अहनी त्रयो भिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः य
मुत्कामा उपेयुरिति श्रुतेः॥ त्रयस्त्रिंशद्रात्राणि रात्रि॥ शीतिसत्राणि। त्रयस्त्रिंशद्रात्रा
णि भवंति। तत्र प्रथमस्याहान्याह। पंचाहाश्चत्वारः॥ तत्र प्रथमे त्रयस्त्रिंशद्रात्रे प्रायणीयाद
नंतरं चत्वारो भिप्लवस्य पंचाहा भवंति। त्रिभ्यो तिरात्रो विश्वजित्। पूर्वस्मिन् विहितानां चतुर्णां पं
चाहानां मध्ये त्रिभ्यः पंचाहेभ्यः परो विश्वजिदिति रात्रो भवति। ततश्चतुर्थः। पंचाहस्ततो दशरात्र
उदयनीय इति। ततश्चैवं प्रायणीयः त्रयो भिप्लवस्य पंचाहाः विश्वजिदतिरात्रः। ततश्चतुर्थो भि
प्लवस्यैकः पंचाहो दशरात्र उदयनीय इति। अतिरात्रस्त्रयः पंचाहा विश्वजिदतिरात्रः। ततश्चतु
र्थो भिप्लवस्यैकः पंचाहो दशरात्र उदयनीय इति अतिरात्रयपंचाहा विश्वजिदतिरात्र एकः
पंचाहो द्वादशाहस्य दशाहान्यतिरात्र इति प्रकृतस्य प्रतिष्ठाकामा उपेयुरिति श्रुतेः॥ व्रतवद्विती
यं अभिप्लवमभिप्लवान्तरयोरतिरात्रो। द्वितीयस्त्रिंशद्रात्रं व्रतवद्भवति महाव्रतयुक्तं भवति
तथा। अभिप्लवं त्रयो भिप्लवा यस्मिन् ततस्त्र अभिप्लवं। प्रायणीयादनंतरं प्रथमं त्रयो भिप्लवा २२
भवंति। तत्र त्रयाणामभिप्लवानां द्वे अंतराले तत्रांतरयोरंतरालयोरतिरात्रौ भवतः ततश्चै
वं। प्रायणीयः अभिप्लवः अतिरात्रः। अभिप्लवः अतिरात्रः। अभिप्लवः दशरात्रो महाव्र

तमुदयनीयइति। अतिरात्रोभिप्लवः षडहोतिरात्रोभिप्लवः षडहोतिरात्रोभिप्लवः षडहो द्वादशा
हस्तदशाहानि महाव्रतं वातिरात्रश्चेति प्रकृत्य यावद्धयेन सत्रे राद्धुवंति तावन्मेता सामद्धि
नि प्रवणात् ननु वृत्तवदित्येतसुनरुक्तमिव भाति। एकाहार्थे दशरात्रात्परं महाव्रतस्य परिभा
षासिद्धत्वात्। सत्यं। सा तु परिभाषा प्रकृतिविहितविषये। अप्रकृतिविहितेषु महाव्रतं दश
रात्रात्परमेकाहार्थ इति उक्तत्वात्। न वेदं सत्रं प्रकृतिविहितं। आवापे तथानुक्तत्वात् अ
तो न पुनरुक्तमिति एवमेव वृत्तेष्वप्यनारायणीत्येतदपि न पुनरुक्तं।। तृतीये त्र्यस्त्रयपंचाहा वि
श्वजितमभितः प्रतिलोमाः परे। तृतीये त्र्यस्त्रिंशद्रात्रे विश्वजितमभित इति विश्वजितः प्र
वेश्वाच त्र्यस्त्रयोभिप्लवस्य पंचाहा भवंति। तेषां मध्ये परे विश्वजितः। पश्चाद्धे त्र्यपः पंचा
हास्ते प्रतिलोमा भवंति। ततश्चैवं। प्रायणीयः त्र्यंशोभिप्लवस्य पंचाहाः विश्वजिदतिरात्राः
ततः प्रतिलोमास्त्रयः पंचाहाः उदयनीय इति। अतिरात्रस्त्रय पंचाहा विश्वजिदतिरात्रस्त्र
यः पंचाहा विश्वजिदतिरात्र इति प्रकृत्य यं कामं कामयंते तेन तं द्व्यध्वप्रभृत इति क्वते सर्वेक्रा
मानां इदं सत्रं।। प्रकृतिविहितान्याचत्वारिंशद्रात्रात्। आवृत्ताभिविधौ चतुर्थे सप्तरात्रमा
चत्वारिंशद्रात्रपर्यंतानि सप्त सत्राणि प्रकृतिविहितानि आवापप्रकारेण प्रणेयानि।।
चतुस्त्रिंशद्रात्रमन्नाद्यकामानां भवति। तत्र प्रायणीयः। त्रिककृतः त्र्यंशोभिप्लवः दशरात्रो

द०सू० महाव्रतमुदयनीयइति। अतिरात्रो ज्योतिर्गौरायुस्त्रयोभिप्लवाः षडहा द्वादशाहस्य दशाहानि म
२३ हाव्रतं चातिरात्र ऋद्धिकामा उपेयुरितिश्रवणात्॥ पंचत्रिंशद्रात्रे॥ पंचत्रिंशद्रात्रे॥ प्रायणी
यपंचाहः त्रयोभिप्लवाः दशरात्र उदयनीयइति। अतिरात्रो ज्योतिर्गौरायुर्गौरायुः पंचाह
स्त्रयोभिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुकामा उपेयुरिति श्रुतेः॥ षट्त्रिं
23 शद्रात्रे प्रतिष्ठाकामानां भवति। तत्र प्रायणीयः चत्वारोभिप्लवाः दशरात्र उदयनीयइति
अतिरात्रश्चत्वारोभिप्लवाः षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुकामा उपेयुरितिश्रु
तेः॥ सप्तत्रिंशद्रात्रमृद्धिकामानां॥ भवति॥ तत्र प्रायणीयः। चत्वारोभिप्लवा दशरात्रो मह
व्रतमुदयनीयइति। एतदेव महाव्रतोदइति श्रुतेः॥ अष्टात्रिंशद्रात्रं प्रजाकामानां पशुका
मानां वा। भवति। तत्र प्रायणीयः गोआयुषी। चत्वारोभिप्लवाः दशरात्र उदयनीयइति अ
तिरात्रो गोआयुषी द्व्यहानि चत्वारोभिप्लवा षडहा द्वादशाहस्य दशाहान्यतिरात्रः पशुका
मा उपेयुरितिश्रुतेः॥ एकोनचत्वारिंशद्रात्रे प्रायणीयः त्रिकद्रुकाः चत्वारोभिप्लवा दशरा
त्र उदयनीयइति॥ अतिरात्रो ज्योतिर्गौरायुरिति त्र्यहश्चत्वारोभिप्लवा षडहा द्वादशाहस्य दशा २३
हान्यतिरात्र एवं वा एताभिर्वै देवा अनंतां श्रियमजयन्निति श्रुतेः॥ चत्वारिंशद्रात्रं वा
चत्वारि प्रजाकामानां पशुकामानां वा भवति। तत्र प्रायणीयः त्रिकद्रुकाः चत्वारोभिप्लव

दशरात्रे ऽग्निमहाव्रतमुदयनीयमिति । एतावेव समहाव्रताविति श्रुतेः ॥ व्रतवान्तं सत्राणि प्र
थमतृतीयवर्जं सप्तैकान्नपंचाशद्रात्राणि ॥ ३ सत्राण्येव समानानि सप्त एकोनपंचाश
द्रात्राणि सत्राणि भवंति । तत्र सप्तानां मध्ये प्रथमतृतीयवर्जं प्रथमं तृतीयं च वर्जयि
त्वा अन्यानि पंच व्रतवंति महाव्रतवंति भवंति प्रथमतृतीये तु महाव्रतरहिते भवतः ॥
प्रथमो विधृतिः ॥ तत्र प्रथम एकान्नपंचाशद्रात्रो विधृति संज्ञकः ॥ अषोडशिकाव
जिरण्यौ । प्रथमे एकान्नपंचाशद्रात्रे विधृतिसंज्ञके प्रायणीयोदयनीयावषोडशिकौ
भवतः २ ॥ कौसुरुविंदः प्रथमत्र्यहस्तूक्थ्योऽहस्तुरोऽत्र प्रायणीयादनंतरं कुसुरुविंद
स्यायं कौसुरुविंदः प्रथमत्र्यहो भवति कुसुरुविंदसंज्ञके दशरात्रे सप्तः प्रथमत्र्यहो ऽग्नि
ष्टोमात्मिकोऽहस्त्रय इति एवात्र भवतीत्यर्थः । तत्र विशेषमाह । अत्र कौसुरुविंदे ऽहे
उभयोर्द्वितीयतृतीययोरुक्थ्यो उक्थ्यसंस्थो भवतः ॥ षोडशि दशमा उक्थ्याः । ततस्त्रमहात्य षो
डशि दशमा उक्थ्या भवंति षोडशी दशमो ऽपोषाने षोडशि दशमाः ॥ पृष्ठ्यं वाभितो द्वादश
द्वादशा अस्मा देवपवनो द्वितीयः पृष्ठ्यः षडहो भवति तं पृष्ठ्यं वाभितः पृष्ठ्यस्य पुरस्तादुप
रिष्टाच्च द्वादश द्वादशोक्थ्या भवंति ॥ वर्गांतरेष्वतिरात्राः । अत्र अहाद्दशोक्थ्या द्वाद
शोक्थ्यपृष्ठ्य द्वादशोक्थ्याः पंच वर्गाः । तेषां वर्गांतरालेषु चतुर्ष्वेवर्गांतरेषु चत्वारोऽतिरा

दे॰ अ॰ च्चाभवंति। ततश्चैवं सिद्धं। प्रायणीयः। कौसुरुविंदस्त्र्यहः। अतिरात्रः। ततो नवोक्थ्याः। ततस्त्र्यः
२४ षोडशी। ततोतिरात्रः। ततो द्वादशोक्थ्याः। अतिरात्रः। एकः। अतिरात्रः। द्वादशोक्थ्याः उदयनी
यश्चेति। अतिरात्रस्त्रीणि त्रिविंशत्यहान्यग्निष्टोममनुवान्यतिरात्रो दशपंचदशा उक्थ्याः षोडशि
मद्दशममहं नि एत्रो द्वादशासप्तदशा उक्थ्या अतिरात्रः पञ्चषडहोतिरात्रो द्वादशपंचदशा
उक्थ्याः षोडशिमम दशमम अतिरात्र इति रात्रकृततो तापावमावृतिरस्य फलं। विपाप्मनाव
र्तनेपन एताउपयतोतिष्कृतेः॥ यमातिरात्रं। द्वितीयस्यैकान्नपंचशत्तमस्य संज्ञा। अभि
धीयश्चेतिशेषः। तत्राह। आह। अभिप्लवो गो आयुषी अतिरात्रावभिप्लवो अभिजिद्विश्व
जितावतिरात्रावभिप्लवः सर्वस्तोमनवसप्तदशावतिरात्रो। अत्र सत्रे प्रायणीयरणीयाहं
तरं प्रथममभिप्लवो षडहौ द्वौ। ततो गो आयुषी अतिरात्रौ। ततो द्वावभिप्लवौ। ततो भिजि
द्विश्वजितावतिरात्रौ। ततो एको भिप्लवः। ततः सर्वस्तोमनवसप्तदशसंज्ञकौ अतिरात्रौ
ततो दशरात्रो महाव्रतमुदयनीयश्चेति। अतिरात्रो द्वावभिप्लवौ षडहौ गो आयुषी अतिरात्रौ द्वा
वभिप्लवौ षडहावभिप्लवविश्वजिद्यातिरात्रावेकोभिप्लवः षडहः सर्वस्तोमश्च नवसप्तदश २४
हस्य दशाहानि महाव्रतं चातिरात्रश्चेतिकृतेः श्रीकामानामिदं श्रीर्भवति परानाउपयंतीति
कृते। अत्रातिरात्रद्वयसंनिपाते प्राप्तिन स्यादिति यांतरः। तत्र व स्यमानमहःसंधानं भवति

24

व॥ आञ्जनाभ्यञ्जनीये ऽभिप्लवाः षट्॥ आञ्जनाभ्यंजनीयं नाम तत्तीयं कान्नपंचाशद्रात्रं। तत्र प्राय
णीयात्परे षडभिप्लवा भवंति। तत्र विशेषः॥ चतुर्थः सर्वस्तोमोऽतिरात्रः। पूर्वस्मिन्नविहितानां षणा
मध्ये चतुर्थोऽभिप्लवेभ्यः परः सर्वस्तोमोऽतिरात्र इति। ततो द्वावभिप्लवौ। ततश्चैवं प्रायणीयः जवाए
भिप्लवाः सर्वस्तोमोऽतिरात्रः। द्वावभिप्लवौ। दशरात्रं उदयनीय इति। अतिरात्रश्चत्वारोऽभिप्लवाः षडहाः
सर्वस्तोमोऽतिरात्रो द्वावभिप्लवौ षडहो द्वादशाहस्य दशाहान्यतिरात्र इति श्रुतेः। सुरभिद्रव्याभ्यंजनश्चा
मानामिदं सत्रं अत्रैव विशेषमाह॥ तस्मिन्नुपसत्सु सर्पिर्विवे युगार्हपत्ये गुग्गुलु सुगंधितेजनपी
तुदारुभिः। तस्मिन्नञ्जनाभ्यंजनीये सत्रे उपसत्सु वर्त्तमानासु गार्हपत्ये ग्गौ गुल्गुलु सुगंधितेजन पीतु
दारुभिः सह पृथक् सर्पिर्घृतं दीहृता विपचेसु॥ सुगंधितेजनं रोहिणमुष्पाणि पीतुदारु देवदारुः। उ
दुंबरस्तत्पन्य इति माधवाचार्याः। पुरुषसंस्कारार्थत्वाद्गार्हपत्येन प्राप्नोतीति गार्हपत्यग्रहणं। अथास्य
त्रिधापक्कघृतस्य विनियोगमाह॥ यथासवनं तैः सर्वैरेवाञ्जनाभ्यंजने ऊर्ध्वैरन्वाग्नीध्रे हरहः अहर
हः सर्वेभ्यो ज्ञोनपंचासं संख्येष्वथहः स आग्नीध्रे अग्नीधः शरणोग्रहोतेर्गोग्गुलवादिभिः सर्पिर्भिर्वि
था सवनं सवनक्रमेण हीहिता आञ्जनाभ्यंजने कुर्वन्गोग्गुलवेन प्रातः सवने सौगंधिकेन मा
ध्यंदिने सवने पैतुदारवेण तृतीयसवने इति श्रुतत्वात्। अञ्जनमक्षोः अभ्यंजनं शरीरस्येति कर्क
माधवाचार्यौ श्रुतौ॥ एतत्स्वाञ्जनं सवनानामादिषु॥ एकैकेषां॥ अथ वा पञ्चदशेषः हः एव प्रतिदिनं एते

हे॰ श्र॰ आंजनाभ्यंजने कुर्वीरन्न सर्वे ब्रह्मसु॥ सवनमुखीयेषु भक्षपिष्टंतो वा। अथवा सवनमुखीयेषु च
२५ मसेषु भक्ष्य पिष्टांत स्नाद्र हूरणा। सर्वे आजनाभ्यंजने कुर्वीरन् सर्वेषु सवनेषु सवनस्य मुखे आ दे
भवाः सवनमुखीयाः प्रस्थित याग एवमसद्गति यावत्॥ आयत्मानं नैव जानीरस्ते षामेतत्। पेषु र
षा आत्मानं नैव जानीरस्तेषामिदं सत्रं भवति। य आत्मानं नैव जानीरस्तु एतारगी हपि युरितिष्कृतेः।
25 इवशब्द एवार्थे जानाति स्वां नर्भावितरणपर्थः न्त्रापये पुरेवविद्धस्भामध्ये स्वात्मानं प्रज्ञापयितु
मसक्ताइत्यर्थः। अनुलोमांजनमांजनं प्रतिलोमांजनमभ्यंजनमिति याज्ञिकाः॥ अत्राश्व
लायन आह॥ उपसत्सर्गार्हपत्येगुल्गुलुसुगंधितेजनपीतुदारुभिः पृथक्त्रयीषिविपद्यानुस
वनं सत्रेषु नाराशंसे पीजीरन्नभ्यंजीरंस्त्रये वर्चसा नभा पुर्येवात्मानं नैव जानीरंस्त्र एताउ पेषु रि
ति। अत्र छंदोगसत्रे विशेषः॥ आंजनाभ्यंजने गार्हपत्य उपसत्सु सर्पीषि फाण्येषु पृथग्त्वसु
रभिभिर्यान्यु क्तानि वाःस्तरणे नातेः सुत्यासु पाकरणे तैलानां सवनानां पूर्वेणाह विर्द्धाने आसीना
आजीरन्न भ्येजो रुत्वा आजीरन्नाहितिरणीगाभ्यांशिवाभ्यंजीरन्निति तत्र छंदोगः मुक्तास्वीथ्रीप रावे
तिगोतमः। अहरहरेतत्कुर्युरिति धानंजय्यशांडिल्यौ। सर्वस्तोम एवेति गौतमः। पच्छाइस्वेक इति।
प्रातरनुवाकमनुवक्ष्यंतः प्रातः सवने प्रसर्वतश्चैव मध्यंदिनयोः सवनयो रितिमानवसूत्रे॥ अथवतु २५
र्थमेकान्नपंचाशद्रात्रमाह॥ संवत्सरसंमिते चतुर्थे समहभिप्लवाश्च त्वारो गो आयुषी त्रिभ्यो

विषुवन्मध्यो नवरात्रः। संवत्सरसंमित इति चतुर्थस्यैकादशपंचाशद्रात्रस्य संज्ञा। तत्र प्रायणीयादनंतरं
चतुर्विंशमहर्भवति ततश्चत्वारोऽभिप्लवषडहाः। ततो गोआयुषी। पूर्वोक्तानां चतुर्णामभिप्लवानाम
ध्ये त्रिभ्योऽभिप्लवेभ्यः परो विषुवन्मध्यो गवामयनिको नवरात्रो भवति। स चाभिजित्त्रयः स्वरसामानो
विषुवांस्त्रयः स्वरसामानो विश्वजिदेवंरूपः। ततश्चैवं प्रायणीयः चतुर्विंशमहस्त्रयोऽभिप्लवाः। अ
भिजित्त्रयः स्वरसामानः विषुवांस्त्रयः स्वरसामानो विश्वजित्। एततएकोऽभिप्लवः ततो आयुस्त
तोगोः। ततो दशरात्रो महाव्रतमतिरात्र इति। अत्र यद्यपि तत्रकारेण गोआयुषी इत्युक्तं तथापि
पंचविंशे आयुश्चगोश्च द्वे अहनी इत्येवमत्र विशेषपाठस्सर्वमायुस्ततो गौरित्येवमनुष्ठेयं। तत्र
त्वस्मात्तरत्वेन गोशब्दस्य पूर्वनिपातः। अतिरात्र चतुर्विंशं प्रायणीयमहस्त्रयोऽभिप्लवाः षडहा अ
भिजित्त्रयः स्वसामानो दिवाकीर्त्यमहस्त्रयः स्वरसामानो विश्वजिदेकोऽभिप्लवः षडह आयुश्च गोश्च
द्वे अहनी द्वादशाहस्य दशाहानिव्रतं चातिरात्रस्य संवत्सरसंमिता यावती संवत्सरस्यर्द्धिस्तावत्येतासा
मृद्धिरिति श्रूयते॥ अथ प्रागप्रतिज्ञातमथैकषष्टिरात्रलाघवार्थं संवत्सरसमितस्याङ्गामनुप्रति
लोमेनांतरेणनिबध्नाति॥ एकषष्टिरात्रे यस्मानो नवरात्रमभितः एकषष्टिरात्रे सत्रे नवरात्रमभि
तः पुरस्तादुपरिष्टाच्च पक्षसः षडहो भवति॥ प्रतिलोमः परः। तयोः पक्षयोर्मध्ये परो नवरात्रादुप
रिष्टात्क्रियमाणः पक्षः प्रतिलोमस्त्रयस्त्रिंशारंभणो भवति॥ प्रतिलोमस्त्वनसर्वसंवत्सरसंमि

६ः स्रः
२६
26

तेनसमानं।ततश्चएकषष्ठिरात्रे एवमेवक्रमःसिद्धःप्रायणीयःउदयनीयः।चतुर्विंशमहः।त्रयोभिप्ल

वाःपृष्ठ्याः।अभिजित्त्रयःस्वरसामानः विषुवान्।त्रयःस्वरसामानः विश्वजित्प्रतिलोमाःपृ

ष्ठ्याः।अभिप्लवः।आयुर्गोः।दशरात्रोमहाव्रतमुदयनीयइति।अतिरात्रश्चतुर्विंशं प्रायणी

यमहस्त्रयोभिप्लवाःषडहाःपृष्ठ्यःषडहोभिजित्त्रयःस्वरसामानोद्विवाकीर्त्यमहस्त्रयःस्वरसा

मानोविश्वजित्पृष्ठ्यःषडहस्त्रयस्त्रिंशःसारंभणात्मकोभिप्लवःषडहःआयुर्गोष्टोमाहनीद्वा

दशाहस्यदशाहानिमहाव्रतंचातिरात्रश्चतदेतदेकषष्ठिरात्रमभिजिदुक्तेः।सद्धिकामानामेतत्स

त्रं।सर्वमृद्धिमधवन्तीतिपतद्यपपंनीतिश्रुतेः।अत्रतासेविशेषःअपनीतघेरावदेवाःषष्ठिरात्रमुपे

युस्तेदेवयेऊनमध्यासायनग्राहमतस्याहुतिंजुहुयुर्द्विवहनाद्देवयजनंनोदेहिस्वाहेतितेइत्तेदेवयज्ञे

यजंतइति।अथपंचमेकाल्पंपंचासद्यत्रमाह।।सवितुःसृजुमः।समिधीयतइतिशेषः।अससस

त्रस्यैदैन्नामातत्राहान्याहा।।नवरात्राश्चत्वारः।।अत्रपंचमेकल्पेपंचाशद्रात्रेचत्वारोनवरात्रा

भवंति।तेकेनवरात्राइत्यत्रएतावामाह।।अग्निष्टोमाःप्रथमसप्तमोत्तमानवचवर्गेराग्नामुत्थ्या

इतरेनववर्गाणांप्रथमसप्तमोत्तमाअग्निष्टोमाभवंति।इतरेअन्येषडुक्थ्याः।।द्वितीयतृती

यचतुर्थपंचमषष्ठाष्टमाउक्थ्याइत्यर्थः ततश्चैवंप्रायणीयः।चत्वारोनवरात्राः।दशरात्रोम २६

हाव्रतमुदयनीयइति।अतिरात्रोनवचत्वारिंशत्संहान्यग्निष्टोममुखःषडहोपयानिन्तिरापहान्यग्नि

ष्टोमावभितउभ्यं मध्यतो नवपंचदशाहान्यग्निष्टोममुखः षडहो यथानि त्रीण्यहान्यग्निष्टोमावभित
उभ्यं मध्यतो नवसप्तदशाहान्यग्निष्टोममुखः षडहो यथानि त्रीण्यहान्यग्निष्टोमावभितउभ्यंम
ध्यतो वैकविंशान्यहान्यग्निष्टोमावभितउभ्यं मध्यतो द्वादशाहस्य दशाहानि महाव्रतं चातिरात्र
श्चेति ॥ प्रजापतेरेकत्वकामानामिदं सत्रं ॥ पौर्वषडभिप्लवौ परे पृष्ठ्यौ क्रान्तं च मात्परे द्वे षष्ठसप्तमे एका
न्नपंचाशद्रात्रे सत्रे षडभिप्लवे भवतः । षडहं एवान्त्र अभिप्लवषडहाययोः स्ते षडभिप्लवौ द्वयोरपि प्रत्ये
कं षट् षडभिप्लवषडहाः भवंतीत्यर्थः । अन्तयोर्मध्ये षष्ठस्य विशेषमाह ॥ पूर्वस्य चतुर्थे वृते । पूर्वस्य
पृष्ठ्ययोः षष्ठसप्तमयोर्मध्ये प्रथमस्य षष्ठस्यैकान्नपंचाशद्रात्रस्य चतुर्थोऽभिप्लवेऽभ्यो वसिते म
परं महाव्रतं भवति । ततश्चैवं प्रायणीयः चत्वारोऽभिप्लवाः महाव्रतं द्वावभिप्लवौ दशरात्रउदयनी
य इति । अतिरात्रश्चत्वारोऽभिप्लवाः षडहं महाव्रतं द्वावभिप्लवौ षडहो । द्वादशाहस्य दशाहान्यतिरात्र
इति पद्धत्यप्रतिष्ठाकामाउपेयुरितिश्रुतेः । कात्यायनस्तु फलांतरमाह ॥ प्रजातिकामानामेतत् ॥
एतत्षष्ठमेकानपंचाशद्रात्रं प्रजातिकामानां प्रजाकामानां यजमानानां भवति ॥ सप्तमे एकान्न
पंचाशद्वृते । प्रायणीयः षडभिप्लवाः द्वादशाहस्य दशरात्रं महाव्रतं उदयनीय इति ॥ अतिरात्रः ष
डभिप्लवाः षडहा द्वादशाहानि महाव्रतं चातिरात्रश्चेति प्रवृत्त्यान्याः प्रजा भवंति यत एउतयंती
श्रुतेः अन्याः प्रजा अतिभवंति अन्याभ्यः प्रजाभ्यः सत्रिणः अधिका भवंतीत्यर्थः ॥ प्रवृत्ति

दे॰ श्र॰ विहितः शतरात्रं चतुर्दशाभिप्लवा चतुरहश्चाश शतरात्रं शतसुत्यं सत्रं प्रकृतं विहितं भवति। कानि
२७ तत्र शतमहानीत्यपेक्षायामाह चतुर्दशाभिप्लवं। चतुर्दशाभिप्लवा यस्य तत् चतुर्दशाभिप्लवं। चतुर्द
शसंख्या अभिप्लवषडहा अत्र सत्रे भवन्तीत्यर्थः। चतुरहश्चात्र भवति चतुरहसद्देनत्रयपरिकल्पिताः
महाव्रतं चेति। एतावदुच्यते नानुप्रकृतिविहितस्य ग्रहणेनाप्येतावति सिद्धे किमर्थं पुनश्चतुर्दशाभिप्लवं
27 चतुरहश्चेत्युक्तं। मंदधियां सुखेन प्रतिपत्त्यर्थमित्यर्थः। अन्यथा तेषां कदाचित्पदे विधा प्रतिपत्तिर्न भ
वति यद्येतावद्भिरेवाभिप्लवैः पूरणं भवतीति। ततश्च प्रकृतिविहितत्वाद्यथोपदेशं महानीनामस्या
प्रकृतेरपक्रमः। प्रायणीय॰ ततस्त्रिकद्रुकाः। चतुर्दशाभिप्लवा दशरात्रो महाव्रतमिति। यद्येवं त
र्हि तदेव वक्तव्यं न प्रकृतिविहितमिति। मैवं। अनुच्यमाने हि तस्मिन्यथोपदेशं महान्यस्तेन न्यायेन चतु
र्दशाभिप्लवेभ्यः परश्चतुरहः स्यात्। तथैव भवत्विति। वेत्ता न स्मृतिविरोधात्। अत्र तो ह्रस्व दुक्ते क्र
मेणैवाहानि विहितानि संति। तथा च श्रुतिः। अतिरात्रो ज्योतिर्गौरायुश्चतुर्दशाभिप्लवाः षडहा दा
शाहस्य दशाहानि महाव्रतं चातिरात्रश्चेति प्रकृत्य सर्वमायुरुपेत्य निवसीयासो भवन्ति य एतदुप
यंतीति। तामेतामस्यैव स्वतत्त्वस्य दर्शनात् स्वबुद्ध्या सतत्त्वं हृदयकमलं निर्मलमिति प्रतिभाति २७
तथा च मानवे। अहश्चतुर्दशषडहा दशरात्रो महाव्रतमायुःकामा यत्तदस्मा उपेयुरभिप्रया
यमभिप्लवावतीति। अत्र विशेषमाह। सदोहविर्धानानि च क्रीवन्ति। अस्मिन् शतरात्रे सदोहविर्द

नानिचक्रिंवंतिवर्ज्जवंतिमंजप्याद्विवञ्चसुक्तानिभवंति। यथापुरुषैः प्रेरिता निबलंवितथोपाये
नकार्यो॥२॥ अभिप्रयायमभिमुखंवंतिदेशानुपरोधेनाहरहः अभिप्रयायमितिगमनलयमना
मीकेयौ अभोत्याभिमुख्ये। अहरहः प्रत्यहं अभिप्रयायश्मायत्वायात्वा अभिगम्याभिगमनम
भिमुखंवंतिसोमाभिषवंकुर्वंति। कथं देशानुपरोधेनादेशस्याभिषवस्थानस्यानुपरोधोऽबाधोदे
शान्य अभिरोधः तेन। न तस्मिन्नेव। अभिप्रयायाभिगमनंकृत्वा यस्मात्स्वस्थानमागम्याभिषवः क्रि
यते। तथा च सूत्रं॥ अभिप्रयायमभिमुखंवंत्याभिक्रान्ते समानत्राभिमुखंवंति प्रतिषिद्धत्वात्। इति। अत्रचं
देशस्येवविशेषः। शतंस्त्रेभिप्रयायमभिमुखंवंति समानत्राभिमुखंवंतीति सविकल्पः स्यात्। अभिप्र
यायवासमानत्रैवेति। एकस्याभिषवस्योभयत्र कर्तुमशक्यत्वात्। तथापाठः सुनुयुर्यथामारस्ल
तेषुसम्याप्रासेसे इत्यर्थः॥ यत्र तु क्वचस्वारसते बुस्वरसत्वात्स्तीरेणोति नियमः। अत्र तु यत्र क्वच
देशोसमानदेशोवा यथान्येषामयातमेवचक्रीवंतीसदोहविर्द्धानानिकारयित्वाहः संस्थासुत
कानि विपरिवर्तयेयुरित्या वार्यास्तदभिप्रयानस्यमप्रयाणं वा समानत्राभिषवः। एवमनु
भयोभ्रुत्वोर्थेवर्त्तिष्टं भवति। अथवाभिप्रयायागत्वामत्वाभिषवप्रभृति अहः संस्थाप
यंतिसमाप्तेहनि स्वस्थानंप्रत्यागच्छंतीति। पुनरपि द्वितीयेहन्यभिप्रयायन्नेवदेशोगत्वा
भिषवमंतिकुर्वंति समाप्तेहनि प्रत्यागच्छंति। एवं प्रत्यहं। देशानुपरोधेनेति प्रथमेहनि यत्र

दे॰अ॰ देशेनत्वाभिप्लवः द्वितीयादिव्यूहः स्यभिप्लवायणेनतस्योपरोधेति क्रमेणकर्त्तव्यइत्यर्थः॥ अयंच
२८ प्रभृत्यहेगणस्य अविरोधीति मत्वा प्रयुक्तं॥ अभिप्लवे पृष्ठ्ये त्रिरुक्थे स्तुके ध्रुवा। अथवा अभिप्लवपाय
मभिपृष्ठ्यं तमीसेन दमिप्लवे पृष्ठ्ये च कर्त्तव्यं न तत्र घ्यति। एके पृष्ठ्यएत्यमहाव्रतं निरुक्थायणी
योदयनीयेषु॥ त्रिरुक्थेष्टुक्थेध्रुवा। अथवा त्रिरुक्थेष्टुक्थे चेतत्कर्त्तव्यं नाभिप्लवे दशरात्रे महाव्रते प्रा
यणीयोदयनीयो तथा चक्रं छन्दोगसूत्रे॥ अहरहरेतत्कुर्युरिति धानंजय्यशांडिल्यो। अभिप्लवे
पृष्ठ्येवेति गौतम॥ त्रिरुक्थेष्टुक्थेष्विति वैजरति॥ अभिप्लवाभ्यासेनाभिपूरणं प्र हतिविहितानां स
त्राणाम् अभिप्लवाभ्यासेन पूरणं। कर्त्तव्यं यद्यभिप्लवाभ्यासेन संभवति तदा तस्यादितः पं
चपंचाहर्ध्वं इत्याद्यपायः॥ तथैव कृतत्वात। अतोऽभिप्लवाभ्यासेन पूरणं स्वरूपतिमलत्वाल्लु
तइत्यादि हेतु प्रसक्तस्यानवकाशः॥ ननु यथाभिप्लवाभ्यासेन सत्राणि पूर्यंते तथा दशरात्रः स
प्यभ्यासेन क्रतुतो न पूर्यंत इत्याशंक्यापनोदार्थमाह॥ सत्रस्य प्रयोगी दशरात्रः॥ द्वादशाहिकोद
शरात्रः शाहृत्यप्रयोगी भवति। एकस्य सत्रस्य मध्ये एकवारमेव प्रयुज्यते नोतोऽतस्तथैव दृष्टत्वात
॥ व्रतवंतिसर्वजितिचतुर्दिनाधिकंसंवत्सरं द्विहाः। यानि व्रतवंतिमहाव्रतसंज्ञकाहर्युं
नि सत्राणि तानि सर्वजो होत्राणि भवंति। यथा सर्वजिति चतुर्दिनाधिकं संवत्सरं द्विहाः। एक २८
दिनाधिकं संवत्सरवा। संवत्सरं वा षण्मासान्वा। छंदोगसूत्रमत्रो यथा जामोपहोवा। नद

28

वृतवस्त्वपि भवंतीत्यर्थः ॥ सप्तदशरात्रादीनि त्रिं॰शदंतान्येक एकान्नपंचाशदंते वा ब्दाहद
शिक्षाणि पौर्णमासीप्रक्रमाणि। एके आचार्याः सप्तदशरात्रादीनि सप्तदशरात्रादारभ्य त्रिंशदंता
नि त्रिंशद्रात्रपर्यंतानि चतुर्दशसत्राणि द्विरेकान्नपंचाशद्रात्रे च ये महाव्रतवर्जिते प्रथमत
तीये वीक्षत्यां जनाभ्यंजनीयसंज्ञे वा एतान्यब्दाहःशदीक्षाणि पौर्णमासीप्रक्रमाणि वा भवंति
पौर्णमास्यां प्रक्रम आरंभो येषां तानि पौर्णमासीप्रक्रमाणि। एके यथाप्राप्तमिति ॥ शतानि
रात्रेहानि शतरात्रसामान्यात्। शतानि रात्रे शतरात्रस्याहानि भवंति कुतः शतरात्रसामान्या
त्। तेन सत्रानि रात्रे॰ सत्रमुपेयुरिति श्रुतौ अहानि च तत्र न म्प्रतानि। अतः शतमुत्सन्नसाह
श्येन सतरात्रस्य सर्वाण्यहान्यतिरात्रसंस्थानि भवंति। इति सर्वः पक्षः ॥ सिद्धांतमाह ॥ द्वादशा
हार्थं वा तत्स्वस्वतेः। वा पूर्वपक्षनिरासे द्वादशाहार्थं द्वादशाहप्रहीनिकं शतातीरात्रभवति। द्वादशा
हस्याघः प्रलभतः प्रकृतिभूतो यस्य तद्वादशाहार्थं द्वादशाहप्रकृतिकमित्यर्थः न शतरात्रमप्र
कृतिकं अतस्मात्र द्वादशाहिका एव धर्मा भवंति न सतरात्रधर्माः अहानि तु शतानि रात्रसमाख्या
येव विहितानि। शतमतिरात्रा यस्मिंस्तच्छतानि रात्रमित्यवर्थसंज्ञा विज्ञानात्। अन्यथ एवं
विधायाः संज्ञापाधेयर्थ्यापत्तेः। तेनात्र शतमतिरात्रा अपूर्वा एव विधीयंते। तेष्वेव सर्वेष्वद्वा
दशाहधर्मा भवंतीति सिद्धं ॥ शतानाग्निष्टोमे शतातोक्थ्ये वात्र यमे वन्यापोरे पः। शतमग्निष्टोमायस्मि

न्नवछक्ताग्निष्टोमं। तेशातातिग्निष्टोमः सत्रमुपेयुरिति श्रुतेः। शतमुत्थाय स्मिन ततछतो त्थं। एवमश
तो ऽथ्येन यावन्निष्टन्यराप्यश्चे न्नावतस्तमोपाघ्रुते ति श्रुतेः। अत्राथन्वर्थसंज्ञे पेवा हविर्धानं। द्वाद
शाह प्रत्नतिकत्वं वेति वकारार्थः॥ अथ शातातिरात्रे विशेषमाह॥ आश्विनस्याग्नेयाते प्रतिप
स्थाता व्युत्क्रामतादित्न्यामैत्रावरुणायप्रातरनुवाकमुपाकृत्यातर्यामं हुत्वा ग्रयीअग्रयवि
त्रं द्रोणकलशेनि दधाति। अत्र सतातिरात्रे प्रत्यहं आश्विनसंतस्यशस्त्रस्याग्नेयाते आग्ने
यक्रत्वं ते अध्वर्युस्तत्र प्रातिगरे व्याप्नत प्रतिप्रस्थाता उत्तरस्याङ्गः संवंधि व्युत्क्रामतादिकर्म
हत्वा आपरराविकं चपात्रे सादनादिसोमोपावहरणांतं कृत्वा होतुराश्विनसस्त्रे व्याप्नतत्वा
त्मैत्रावरुणायप्रातरनुवाकमुपाकृत्यातर्यामं हुत्वा अंतर्याम्ग्रहहोमांतं कृत्वा ग्रहग्रहण
र्थमुपात्तमिविंततं पवित्रं हस्तेन प्रयीमप्रक्षर्षेणायोडपित्वा नीरसं ज्ञात्वा द्रोणकलशेनि दधाति
द्रोणकलशस्योपरि निदधातीत्यर्थः॥ ससेषहोरचमसं। होरचमसं व सशेषं निदधाति। स्था
पयति। अत्र च वरुणप्रघासवदर्थात्क्रमसादीनि पात्राणि द्विगुणसंख्यानीपानि। अन्य
न्यथा पूर्वस्मिन्नहन्यसमाप्ते तत्र विनियुक्तानां पात्राणामन्यत्र ग्रहीतुमशक्यत्वात्। सहो
वाचयत्र होताश्विनं सत्ता अग्नेयस्य कृतोन्नाय अत्रस्य छंदसः पारं गच्छान्न प्रतिप्रस्थातावस
तीवरीः परिहत्य मैत्रावरुणास्य हविर्द्धानयोः प्रातरनुवाकमुपाकुर्यात् द्वे हे ताशः शातिश २९

मैत्रिनैरोजंजप्यमानश्वाज्याहतन्मध्यावापावावांप्रत्येजिनछंदसाछंदः परिहितेप्रातरनुवाकेयथाय
तनमेवोपाठश्चांतर्यामोहुत्वाद्रोणकलशेपवित्रंप्रपीडयति इधातीतिश्रुतेः। अत्रप्रातिप्रस्था
तुर्विशेषउच्यते॥ शाखाछेदसतीवरीग्रहणेमाध्यंदिनसवनेनकुर्यात्। अपूर्वंकार्येततोक्र
मतादिसोमोपावहरणांतेतत्रयथासंभवंसमिस्वाध्यायोपगमः। परिस्तरणमस्यवा। पत्नीव
संनह्यवापीधयः सन्येवशेषमासाघने। अभिषवकालेअग्नौनिगरेभिषवेवा॥ निरोत्साहि
करोतिपर्वस्याङ्गानततः स्वर्येउदितेआग्नीध्रशस्त्रसमाप्तेअध्वर्युः पूर्वस्याङ्गः सिरोध्याहितिरो
ध्यासोमयागादिकर्मकरोतीतितिरोऽह्न्यानित्वाप्रत्वंवः प्रतिप्रत्यातिरोध्यानेवमहृत्पित्वाअथानुप
र्वेयज्ञपुच्छसः स्थाप्येतिश्रुतेः। तिरसशब्दोत्तह्नोनिपातोव्ययं। अंतर्द्धिर्व्यवधानं। तिरश्चतदहश्चे
तिविशेषणविशेष्येणबहुलमितिकर्मधारयः। विभक्तिलोपः। राजाहःसखिभ्यष्टजितिटच। अह्नो
ह्नएतस्मादेनमयपद्मर्वस्याहनशब्दस्याह्नादेशः। तिरोह्न इति स्वरः पंरां अत्रातिहितम्प्येवहितम
हरितितस्यार्थः। तिरोह्नरात्रंजातिहितेहनिभावासोमानिरोह्न्याः। दिगादेशत्वान्निगणत्वात्यत्।
अग्निनसत्त्वकयागसंबंधिनः चमसस्थाः सोमाः पूर्वेद्युनिष्पन्नत्वात्तिरोध्याश्चयंते।
तत्वचाएदिक्करोतीत्यर्थः॥३॥ ग्रहग्रहणाघाविक्रहोमान्कृत्वासवनसंसनिवनुहोत्पत्तिः प्रा
तःसवनवत्तिनततपूर्वस्याङ्गोपतत्पुच्छेसमाप्तेपुनः पवित्रेवितत्यपेन्द्रचमसेयजमानेनहस्ते

दे॰ अ॰ नगृहीते प्रकृतिवद्भाराणायाग्रहण्या मध्यंदिनाग्रयवादित्यग्रहग्रहणादि विप्रुड्होमान्तं कृत्वा सकृद्गृहीतेनाग्निः
३० प्रातःसवनेपात्वस्मानितिमंत्रेण सवनसंततिसंज्ञामाहुतिमाहवनीये जुहोति। अथानुपूर्वं यज्ञ
पुच्छ॰ स॰ स्यायेऽर्द्धं अंतर्यामाद्ग्रहाग्रान्गृहीत्वा विप्रुषा॰ होम॰ हुत्वा संततिं च वहिष्पवमानेन
नस्तुत्वा हरेवप्रतिपद्यारंति अत्रवरणान्तरानन्तुग्रहासनावेसंज्ञाप्रकरणास्पष्टनिः प्रयोजनत्वात्किमर्थं
30 सवनसंततिनिमित्तमुक्ते। उच्यते। कृतौ विप्रुषा॰ होम॰ हुत्वा संततिं त्वेन्मुक्ते। एवं च सति यद्यस्या
आहुतेरीपं तेनिन्द्यस्येतत्र संततनिवेति कृतिमाग्ध्यातानभवति॥ इयं चाहुतिरेतत्प्रतिति के
तिसंज्ञा च भवति। तस्मात्कृतौ या संततिवहुत्वेन्त्वाहुतिर्विहिता सेयमितिज्ञापनाय सवनसंत
तिनिमित्तमुक्ते। एतच्चाश्विनस्याग्नेयातत्त्वाद्यहःसंघाते शतातिरात्रे समाप्तिर्यावत्प्रत्यहं कर्तव्यं
अन्यत्रापि वैदग्निरात्रयमतिरात्रादावतिरात्रद्वयसंनिपाते भवत्येवाहःसंघ न समानन्यायात्
तथा च शाखायनः सामान्येनाहाद्विरात्रप्रभृतिष्वहःसंघातेषु पत्रहोताश्विनसंसेत्तत्रमैत्रा
वरुणप्रातरनुवाकमनुब्रूयादिति अस्या भाष्ये द्विरात्रप्रभृतिष्वतिरात्रगणेष्विति॥ संवत्सर
प्रभृतीनां गवामयनप्रकृतित्वं तद्गुणदर्शनात्। संवत्सरप्रभृतीनि संवत्सरमुत्पादीनि सत्राणि ३०
गवामयनप्रकृतीनि भवंति। कुतः तद्गुणदर्शनात् गवामयनगुणानां संवत्सरप्रभृतिषु सत्रे
षु दर्शनात् तद्गुणाहि दृश्यंते यो आदित्यानामयनादौ अभिप्लवषडाहः॥ आदित्यानामयन

नेभिप्लवस्त्रिवृत्पंचदशस्तोमाः। आदित्यानामयनमिति सत्रस्यनामातत्रगवामयनप्रकृतित्वात्सर्व
तद्धान्यप्राप्तंताद्विशेषयति। आदित्यनामयनसंज्ञके सत्रे अभिप्लवाः षडहास्त्रिवृत्पंचदशस्तोमाभ
वंति तत्रायुग्मान्यहानित्रिवृत्स्तोमकानि युग्मानि तु पंचदशानीति षडहेषु त्रिवृत्पंचदशयोर्वि
वेकः। उत्तरपक्षेत्वविपरीतं। अयुग्मानि पंचदशानि। युग्मानित्रिवृत्स्तोमकानीति॥ मध्याः प
क्षमध्याः। पक्षयोर्मध्येयेषां ते पक्षमध्याः। गवामयने हि पक्षयोर्नाममासाः उक्ताः चत्वारोभिप्ल
वाः पक्षश्चेति षट् पक्षमध्यः कर्तव्याः। द्वौ अभिप्लवौ पक्षः द्वावभिप्लवावित्येवं रूपाः॥ बृहस्प
तिसवोभिजित्स्थाने। षष्ठे मासेभिजिदग्निष्टोमइत्यस्य स्थाने त्रिवृद्बृहस्पतिसवो भवति। एका
हिकबृहस्पतिसवधर्मक इत्यर्थः तेनोपालंभ्यग्रहग्रहणाभिषेकादिसर्वमत्रबृहस्पतिसववद्भ
वति। एकाहिकबृहस्पतिसवधर्मक इत्यर्थः तेतोपाः स्तोमो विश्वजितः उत्तरस्मिन्पक्षे सप्तमेमा
से अभिजित्स्थाने विश्वजिदग्निष्टोम इत्यस्य विश्वजितः स्थाने पंचदश उथसंस्थः स्तोमो
भवति॥ विश्वजितः परेये त्रयोभिप्लवास्तेषामुत्तरयोः स्थाने त्रिवृतोग्निष्टोमाः दशविश्वजि
तः परेजे त्रयोभिप्लवास्तेषामुत्तरयोर्द्विबलभिदौ च भवतः तीयोस्थाने त्रिवृत्स्तोमाः दशाग्निष्टो
मा भवंति। उद्भिद्बलभिदौ चादशाम्पोग्निष्टोमेभ्यः परावुद्भिद्बलभिदौ च भवतः एवं द्वयोरभि
प्लवयोः स्थानं परिनिष्ठितं॥ षष्ठमासाहे मध्यमस्थाने पक्षः उत्तरस्मिन्पक्षे षष्ठमासस्याद्येये त्रयो

हे॰श्र॰ भिप्लवागवामयने विहितास्ते षात्र पाराणां मध्ये मध्यमस्याभिप्लवस्य स्थाने पृष्ठ्यः षडहो भवति ॥ १
३१ शारम्भस्य षष्ठं होमदशाहः द्वादशाहिकदशरात्रस्य स्थाने षष्ठं होमदशाहो भवति । तत्र प्रथममहः षष्ठा
विंशा १ ॥ ततश्चत्वारि सारचत्वारिंशं ३ षड्विंशा ४ द्वात्रिंशं ५ त्रिंशं ६ द्वे अष्टाविंशो ७ पंचविंशं ८
चतुर्विंशं १० इति । ततस्त्वार्यम्णः प्रायणीयः चतुर्विंशमहः । द्वावभिप्लवौ पृष्ठ्यः । द्वावभिप्लवौ । एवं
31 प्रथमो मासः एवमेव द्वितीयस्तृतीयश्चतुर्थः पंचमः षष्ठोऽत्र पोऽभिप्लवाः ॥ पृष्ठ्यः षडहस्थाने स्व
रसामानस्त्र्यहः । विषुवानात्र्यहः स्वरसामानः । ३ इं स्तोमः अत्यग्निष्टोमः प्रतिलोमः पृष्ठ्यः । त्रिवृतो
वरुणदशाग्निष्टोमाः उडि छन्दभिहो । एवं सप्तमो मासः । अष्टमे मासि द्वे पंचदशास्त्रिवृतावभिप्ल
वौ प्रतिलोमः पृष्ठ्यः । द्वावभिप्लवौ । एवमष्टमो मासः । एवं नवमदशमैकादशाः द्वादशे पंचदशास्त्रि
वृदेको भिप्लवः ततः पृष्ठ्यः । ततः पंचदशास्त्रिवृदेकोभिप्लवः । ततो गो आयुषी ॥ ततश्छन्दोम द
शाहः । महाव्रतमुदयनीयः इति अतिरात्रश्चतुर्विंशं प्रायणीयमहः षष्ठोऽग्निष्टुत्पंचदशो षडहोऽपृष्ठ्य
षडहो द्वौ त्रिवृतं च दशौ षडहो समासः स द्वितीयः स तृतीयः स चतुर्थः पंचमं स्त्र्यहस्त्रिवृत्पंच
दशाः षडहाः पृष्ठ्यः षडहस्त्रिवृद्धहस्य सिस्तोमस्त्र्यहः स्वरसामानो दिवाकीर्त्यमहस्त्र्यहः स्व
रसामानः पंचदशा ३ इस्तोमः अत्यग्निः पृष्ठ्यः षडहस्त्र्यहास्त्रि ॥ शारंभणा एकः पंचदशास्त्रिवृत् षड ३१
हो द्वादशाहस्य दशाहानि मुठा अग्नीष्टोमास्त्रिहतउडि च वलभिवद्धे अहनी द्वौ पंचदशास्त्रि

द्वितीयः षडहौ पञ्चमः षडहो द्वौ पंचदशत्रिवृतौ षडहौ सुमासः स द्वितीयः स तृतीयः स चतुर्थः स पंचमाः
चदशत्रिवृत्षडहः पञ्चमः षडहः पंचदशत्रिवृत्नवडहो गो आयुष्टोमौ द्वे अहनी षष्ठं षट्टोमदशरात्रो व्रावत्वा
रिंशः प्रथममहः रथन्तु अवारिशं चवारिं० शः सप्तविं० स सप्तत्रिं० शं त्रिं० शद्वे अक्काविं० शो पंचा
वे० शं चतुर्विं० शं महाव्रतेवानि एतच्च आदित्यानामयने पञ्चमं मध्ये पञ्चेन वा आदित्याः स्वर्गं लोकं
मा आक्रमंतेति श्रुतेः। अस्य स्वर्गः फलं॥ आंगीरसामयनमादित्यानामयनवत्। आंगीरसामयनं
नामसत्रमादित्यानामयनं भवति। तत्र विशेषमाह॥ अभिप्लवाख्ये हृतेः आदित्यामयने हि अ
भिप्लवाख्ये वृतं च दस स्तोमाः अत्र तु त्रिवृत्स्तोमका अभिप्लवा भवन्ति॥ मासाः पञ्चाद्यं कृ प्र
र्वपहे आदित्यामयने मासाः पञ्चमध्याः अत्र तु पूर्वपक्षे मासाः पञ्चाद्यो भवन्ति। आद्यो प
ञ्चः षडहस्ततश्चत्वारो अभिप्लवा इत्येवं॥ प्रतिलोमाः परे उत्तरपक्षे मासाः प्रतिलोमा विपरीताः
पञ्चानां तामासा भवंतीत्यर्थः प्रथमं चत्वारो अभिप्लवास्ततः पञ्च इत्येवं॥ यो अभिप्लवमध्ये पञ्च
उ अमसा आदित्यानामयने उत्तरे षष्ठमासाद्येमध्यमस्थाने पञ्च इति सत्रे एण षष्ठमास
स्याद्येमध्यमस्याभिप्लवस्य स्थाने यः पञ्चउक्तः अत्र तु स पञ्चउत्तमो भवति। प्रथमं द्वाव
भिप्लवो ततः पञ्च इत्येवं॥ गो आयुषी प्रतिलोमे विपरीतक्रमे अत्र भवतः। पूर्वं आयुः प
श्चात् गौरीत्येवं॥ छंदोदशरात्र आदित्यानामयने यो दशरात्रस्थाने छंदोमदशाह उक्तः

दे॰ अ॰ सोऽयमप्रतिलोमो भवति। अतिमा२ऋस्वारम्भात् ततश्चैवं अग्न्यागमः। प्रायणीयं चतुर्विंशम
३२ हः पृष्ठ्यः चत्वारस्त्रिवृतोऽभिप्लवाः। एष मेको मासः। एवमेव द्वितीयतृतीयचतुर्थपंचमाः॥ ष
ष्ठेऽप्यस्त्रिवृतोऽभिप्लवाः। पृष्ठ्यः। त्रिवृत्सप्तदशसवः। द्वादशसामानः विषुवान्। त्रयः स्वरसामा
नः। पंचदशैकविंशस्तोमउभयः। प्रतिलोमः पृष्ठ्यः एकस्त्रिवृत्त्रयोऽभिप्लवः। द्वादशाहस्य दशाहानि
32 दशाऽतिरिक्तस्तोमा आप्तोर्यामाग्निष्टोमाः। उद्भिद्बलभिदौ। एवं सप्तमो मासः। अष्टममेव चत्वारस्त्रि
वृतोऽभिप्लवाः एकः पृष्ठ्यः। एवमेव नवमदशमौ मासौ। एकादशे द्वौ त्रिवृतावभिप्लवौ। पृष्ठ्यः
आयुः। गौः। प्रतिलोमश्छन्दोमदशाहः तत्र चतुर्विंशं प्रथममहः द्वे अष्टाविंशे त्रिंशद्वात्रिं
शं षट्त्रिंशं चतुश्चत्वारिंशं अष्टाचत्वारिंशं। चतुर्विंशं महाव्रतं। उदयनीयमिति। अतिरात्रश्चतु
र्विंशं प्रायणीयमहः पृष्ठ्यः षडहश्चत्वारस्त्रिवृतोऽभिप्लवाः षडहाः समासः स द्वितीयः सतृ
तीयः स चतुर्थः स पंचमः एवमस्त्रिवृतोऽभिप्लवाः षडहाः पृष्ठ्यं षडहस्त्रिवृद्द्वादशस्यातिस्तोमस्त्र
यः स्वरसामानो दिवाकीर्त्यमहस्त्रयः स्वरसामानः पंचदशैकविंशस्तोम उत्क्ष्या पृष्ठ्यः षडहस्त्रय
स्त्रिंशारंभाराएण्कास्त्रिवृदभिप्लवः षडहो द्वादशाहस्य दशाहानि व्रता अतिष्टोम सितद्भा
उद्भिद्बलभिदौ ह्यहनी चत्वारस्त्रिवृतोऽभिप्लवाः षडहाः पृष्ठ्यः षडहः समासः स द्वितीयः सतृ ३२
तीयः स चतुर्थी द्वौ त्रिवृतावभिप्लवौ षडहौ पृष्ठ्यः षडह आयुश्च गौश्च द्वे अहनी छन्दोमदशाह

हस्य चतुर्विंशः। प्रथममहरहः अष्टाविंशो त्रिंशो द्वात्रिंश॰ षड्वि॰ चत्वारिंशं चतुश्चत्वारिं॰ समष्टाचत-
रिं॰शं चतुर्वि॰शं महाव्रतं वा त्रिरस्याङ्गिरसां पुरस्तात्पञ्चेन वा आङ्गीरसः स्वर्लोकमात्र-
मंतितिना प्रेक्ष्यकृतत्वात्।। इति वान्वतोरयनमेकैकेन पञ्चस्तोमेन मासमासं। इति वान्वतो-
रयनमिति सत्रस्य नामा तत्रैकैकेन पञ्चस्तोमेन मासमासं नयेत्। पञ्चस्तोमास्त्रिवृत्पंचदशसप्त-
दशैकवि॰शत्रिणवत्रयस्त्रिं॰शाः। एतेषां त्रिवृदादीनां मध्ये एकैकेन मासं पूरयेत्। प्रथमं मासं
